*AH-I/Sanskrit-101C-1/19*

# B.A. Semester I (Honours) Examination, 2018-19

## SANSKRIT

**Course ID : 10911** **Course Code : AHSNS-101C-1**

Course Title: Classical Sanskrit Literature (Poetry) & Chanda

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोनिर्देशानुसारं यावन्तः प्रश्नाः समाधेयाः तेषु अवश्यमेव यथेच्छ प्रश्न*द्वयस्य* उत्तरं संस्कृतभाषायां देवनागरलिप्या च प्रदेयम्। 2×5=10

Group-A

(किरातार्जुनीये)

प्रश्न*द्वयं* समाधेयम्। 2×2=4

(I) वनेचरः युधिष्ठिरं कीदृशीं वाचमकथयत्?

(II) 'तवानुभावोऽयम्' इत्यस्य संधिविच्छेदः विधेयः।

(III) ''परैति कार्श्यं यशसा समं वपुः''– इत्यस्य वाक्यस्य कः अर्थः? कस्मिन् प्रसंगे एषा उक्तिः विहिता?

Group-B

(कुमारसंभवे)

प्रश्न*द्वयं* समाधेयम्: 2×2=4

(I) पार्वत्याः तपश्चरणस्य स्थानं कीदृशमासीत्?

(II) ''विवेश कश्चिज्जटिलस्तपोवनम्''– कः विवेश? स च कीदृग्दर्शनम् आसीत्?

(III) ''तवानुवृत्तिं न च कर्तुमुत्सहे''– कः कथं कस्याः अनुवृत्तिं कर्तुम् अनुत्साहितः बभूव?

Group-C

(छन्दोमंजर्याम्)

*एकः* प्रश्न*:* समाधेयः 2×1=2

(I) इन्द्रवज्रा-छन्दसः लक्षणं लिख्यताम्।

(II) छन्दोमंजरीमनुसृत्य गुरोः लक्षणं प्रदेयम्।

**2.** अधोनिर्देशानुसारं यावन्तः प्रश्नाः समाधेयाः तेषां समेषाम् एव उत्तरं संस्कृतभाषायां देवनागरलिप्या च लेख्यम्।

Group-A

(किरातार्जुनीये)

*एकस्य* श्लोकस्य व्याख्या कार्या। 5×1=5

(I) क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः।।

(II) विहाय शान्तिं नृप धाम तत् पुनः प्रसीद संधेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः।।

Group-B

(कुमारसंभवे)

*एकस्य* श्लोकस्य व्याख्या करणीया। 5×1=5

(I) तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता।।

(II) उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम्।।

Group-C

(छन्दोमञ्जर्याम्)

(I) *एक*माश्रित्य टीका लेख्या। 5×1=5

(a) स्रग्धरा

(b) द्रुतविलम्बितम्

(II) अधोनिर्दिष्टेषु यथेच्छं *द्वयस्य* छन्दोनिरूपणं कार्यम् 2½×2=5

(a) किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

(b) प्रवर्ततां प्रकृतिहिताय पार्थिवः।

(c) लोको नियम्यत इवैष दशान्तरेषु।

(d) मम विरहजां न त्वं वत्से शुचं गणयिष्यसि

**3.** अधोलिखितेषु *एकस्य* प्रश्नस्य उत्तरं लेख्यम्। 10×1=10

(a) युधिष्ठिरं प्रति द्रौपद्याः भाषणं वर्ण्यताम्।

(b) पार्वतीं प्रति ब्रह्मचारिणः जिज्ञासा आलोचनीया।

(c) किरातार्जुनीयस्य प्रथमसर्गस्य विषयवस्तु लिख्यताम्।

---